# गीर्वाणपत्रिका

डिसेम्बर् २०२४-मार्च २०२५ ( संयुक्ताङ्कः )


# षष्ट्यब्दपूर्ति-उत्सव-विशेषाङ्कः



## अनुक्रमणिका


| | | | |
|---|---|---|---|
| गुरूपदेशः | १ | ग्रामसन्तर्पणम् | १५ |
| निवेदनम् | १ | संवित्-सुधा | १६ |
| कार्लाक्षेत्रे पर्वदिनम् | ३ | दुग्धशर्कराऽवकाशः | १६ |
| मार्कण्डेय-हवनम् | ४ | अभिज्ञानशाकुन्तलम् | १७ |
| सहस्रकलशाभिषेकः | ५ | ललिता-सहस्रनाम-हवनम् | १८ |
| गुरुमहिमा | ६ | कुमारिका-पूजनम् | १९ |
| कनकाभिषेकः | ७ | विशेषकार्यक्रमाः | २० |
| ललितकलाप्रस्तुतिः | ८ | सम्पूर्ण-भगवद्गीतापठनम् | २१ |
| स्वर्णिमः अवकाशः | ९ | गुरुपूजनम् | २२ |
| निवासयोजना | ९ | कार्तिक-शिबिकोत्सवः | २३ |
| नृत्यप्रस्तुतिः | १० | अन्य-सांस्कृतिक-कार्यक्रमाः | २४ |
| पुस्तकविमोचनम् | ११ | विदेशतः प्रस्तुतिः | २५ |
| बालरञ्जनी-शब्दपटः | १२ | गरबानृत्यम् | २७ |
| सुदिनं सुदिनम् | १३ | मनोगतम् | २८ |
| | | | २९ |
| | | | ३० |

## ॥ गुरूपदेशः ॥



**दशमगुरु-परमपूज्य-**
**श्रीमत्-परिज्ञानाश्रम-स्वामिवर्यः ।**

गुरुः स्वयमेव ब्रह्मस्वरूपो वा भगवतः अवतारः अस्ति। सः कर्तुम् , अकर्तुम् अन्यथाकर्तुं च शक्तिं धारयति । अर्थात् सः असम्भवं सम्भवं कर्तुं शक्नोति । सः अनागतं निवारयितुं शक्नोति, यत् अतीतं तस्य प्रभावम् अपि शमयितुं शक्नोति ।



**एकादशगुरु-परमपूज्य-**
**श्रीमत्-सद्योजातशङ्कराश्रम-स्वामिवर्यः ।**

मन्त्रः भगवतः शरीरम् अस्ति । जपारम्भपूर्वमेव साधकः मानसिकतया गुरोः अनुमतिं रक्षणं च याचेत, ततः साधनां प्रारभेत। एतेन साधकोपरि गुरोः कृपा अवतरिष्यति ।

गुरूपदेशानुवादः - शीला कळावर , ठाणे

## निवेदनम्

ॐ श्रीगुरुभ्यो नमः । ॐ श्रीभवानीशङ्कराय नमः । ॐ श्रीमात्रे नमः ।

**सर्वश्रुतिशिरोरत्न-विराजितपदाम्बुजः।**

**वेदान्ताम्बुजसूर्यो यस्तस्मै श्रीगुरवे नमः॥**

गतनोव्हेम्बरमासे नवमदिनाङ्कतः सप्तदशदिनाङ्कपर्यन्तम् अस्माभिः कार्ला-नगरे विलक्षण-समारोहस्य साक्षिणः तथा तस्मिन् सहभागिनः भवितुं परमसौभाग्यं प्राप्तम्।

आम् , अयम् आसीत् अस्माकं प्रतिपदं मार्गदर्शनं , प्रतिक्षणं परिपालनं कुर्वतां परमपूज्य-सद्योजातशङ्कराश्रम-गुरुवर्याणां षष्ट्यब्दपूर्ति-उत्सवः।

**'धृतशिवमयगात्रं साधकानुग्रहार्थम् ...'** वचनानुसारं साक्षात् श्रीदक्षिणामूर्तितः समारब्ध-दिव्य-गुरुपरम्परायाः अनुग्रहेण अस्माकं कृते अवतरिताः परमपूज्य-सद्योजातशङ्कराश्रम गुरुवर्याः। तान् प्रति श्रद्धां प्रीतिम् आदरं च प्रकटयितुं विजृम्भणेन सुसम्पन्नः अयं समारोहः न भूतो न भविष्यति एव ।

आध्यात्मिकमूल्यानां मूर्तिमतां परमपूज्यगुरुवर्याणां शिवसङ्कल्पेन , मार्गदर्शनेन च नैके जनाः पूजनपठनम् ,

अनुष्ठानं कर्तुम् आरब्धवन्तः । परमपूज्यगुरुवर्यैः विशदीकृत-स्वाध्यायादिषु , प्रगल्भ-चिन्तनार्थम् आरब्धेषु अभिव्यक्ति-विमर्शादिषु समाजः प्रवृत्तः। अस्मिन् 'शिवसायुज्यम्' संवत्सरे तु एकः आध्यात्मिकतरङ्गः सर्वत्र प्रसृतः । प्रत्येकः साधकः अस्मिन् तरङ्गे निमज्जितः भवितुम् उत्सुकः । देशविदेशतः साधकाः सोल्लासं श्रद्धया साधनायां सहभागिनः सम्भूय दीव्यतायाः अनुभूतिं कुर्वन्तः आसन् । अस्मिन् उत्सवे अस्याः सेवासाधनायाः श्रीचरणयोः समर्पणं सञ्जातम् ।

अस्मिन् नवदिन-उत्सवेषु नैके धार्मिक-सांस्कृतिक-कार्यक्रमाः सम्पन्नाः । देशविदेशतः साधकाः प्रेम्णा भक्त्या च परमपूज्यगुरुवर्याणां पादपद्मयुगले सङ्गीत-नृत्य-नाटक-भजन-पूजन-कीर्तन-इत्यादिभिः भिन्न-भिन्न-रूपेण स्वसेवां समर्प्य सार्थकताम् अनुभूतवन्तः।

परमपूज्यगुरुवर्याणां प्रति कृतज्ञतां प्रकटयितुम् अयं तु उत्तमः अवसरः आसीत् । विगत-२७- वर्षेषु परमपूज्यगुरुवर्याणाम् अविरत-मार्गदर्शनेन तथा तेषाम् अनुग्रहेण नैके नव-नव-प्रकल्पाः सम्प्रवृत्ताः। बालकेभ्यः उत्तमान् संस्कारान् प्रदातुं 'प्रार्थनावर्गः' , सामाजिक-सांस्कृतिक-आध्यात्मिक-दायित्वं युवानः अभिज्ञापयितुं तथा मठगुरुपरम्परया सह तेषां सम्बन्धं दृढीकर्तुं 'युवधारा' , शिराली-ग्रामीण-महिलाभ्यः आर्थिकस्वतन्त्रतां प्रदातुं 'संवित्-सुधा' इत्यादयः अनेकाः परियोजनाः समारब्धाः। देवभाषा-संस्कृतस्य प्रचारः प्रसारः भवेत् तथा संस्कृतशिक्षणं सर्वेषां कृते सुलभं , स्वतन्त्ररीत्या उपलब्धं भवेत् इति सङ्कल्पनया 'गीर्वाणप्रतिष्ठा' संस्थापिता । परमपूज्य-गुरुवर्याणां मार्गदर्शनेन तथा कृपाप्रसादेन न केवलम् आध्यात्मिक-क्षेत्रे अपि तु भिन्न-भिन्न-क्षेत्रेषु अस्माकं समाजस्य अभिवृद्धिः स्पष्टतया दरीदृश्यते ।

परमपूज्य-गुरुवर्याणां पीठारोहणात् अनन्तरं सञ्जातम् इदं सर्वम् आत्मनिरीक्षणेन अभिज्ञातुं तथा पुनश्च अधिकाधिक-सेवासाधनायाः कृते सिद्धः भवितुम् अयम् अवसरः सम्प्रेरकः भवति।

अस्मिन् षष्ट्यब्दपूर्ति-उत्सव-विशेषाङ्के कार्लातः मधुरस्मृतिभिः प्रत्यागतैः साधकैः अस्य विलक्षणसमारोहविषये प्रेषितानां लेखानां समावेशः वर्तते ।

अयं विशेषाङ्कः डिसेम्बर २०२४ तथा मार्च २०२५ अङ्कयोः संयुक्तसंस्करणम् अस्ति ।

**त्वत्पादस्मरणं भवेत् प्रतिभवं सन्मङ्गलं मङ्गलम् ॥**

इति सम्प्रार्थ्य वयम् इदं श्रद्धा-सुमनं सविनयं श्रीचरणयोः समर्पयामः।

**सम्पादिका**

# कार्लाक्षेत्रे पर्वदिनम्

– **सुमन हिरेबेट, बेङ्गलूरु**




जगज्जनन्याः श्रीदुर्गापरमेश्वर्याः गोपुरं दूरतः दृष्टम् । यथा चन्द्रोदयसमये समुद्रराजः उत्तुङ्गतरङ्गैः उल्लसितः भवति तथा अस्माकं मनः उल्लसितम् ।

श्रीमातुः दुर्गापरमेश्वर्याः दर्शनं प्राप्य तां भक्तिपूर्वकं नमस्कृत्य वयं श्रीगणेशवन्दनं कृतवन्तः । ततः श्रीपरिज्ञानाश्रम-गुरुवर्याणां सञ्जीवनी-स्थानं प्राप्तवन्तः ।

स्मयमानानां परमपूज्य-श्रीपरिज्ञानाश्रम-गुरुवर्याणां दर्शनेन धन्यतां प्राप्य, भक्तिपूर्वकं गुरुवर्यान् प्रणम्य, तीर्थं च स्वीकृत्य वयं कैलासमण्डपं प्राप्ताः । तत् दिनं पर्वदिनम् । अस्माकं परमादरणीयानां पूज्यानां गुरुवर्याणां षष्ट्यब्दपूर्ति-उत्सवः सम्भ्रमेण आचरितः। तत्रस्थाः दोलायमानाः उत्तुङ्गकल्पवृक्षाः, विकसितपुष्पाणि, स्मयमानानि सस्यानि सर्वेषां स्वागतं व्याहरन्तीति दृष्टम् । सर्वत्र उल्लासः ।

कैलासमण्डपे यदा श्रीसद्योजात-शङ्कराश्रम-गुरुवर्याणाम् आगमनं घोषितं , सर्वत्र उत्साहः वर्धितः । भक्तिभावनया वयं सर्वे नमस्कृतवन्तः । तदनन्तरं परमपूज्य-गुरुवर्याणां दिव्यवाण्याम् उपदेशं श्रुत्वा मम मनः तृप्तं जातम् । पादुकापूजनेन तथा गुरुवर्याणां दिव्यकरकमलाभ्यां तीर्थं प्राप्य धन्या अभवम् अहम् ।

कार्यक्रमस्य अन्ते गुरुमात्रा पूजनीय-सुधामहोदयया लिखितं पुस्तकं प्राप्तम् । इदानीं हृल्लेखा-परिप्रश्नाः इति पुस्तकस्य पठनेन अपूर्व-आनन्दस्य अनुभूतिः निरर्गलतया प्राप्यते।

# मार्कण्डेय-हवनम्

– **साधना काण्किणि , बेङ्गलूरु**

क्रोधी नाम संवत्सरे कार्तिकमासे नवमं दिनम् अस्माकं कृते अतीव श्रेष्ठतमं दिनम् आसीत्। तस्मिन् दिने अस्माकं गुरुवर्याणां षष्ट्यब्दपूर्तिः अभवत् ।

मानवशरीरस्य दौर्बल्यं षष्टितमे आयुषि वर्धते इति मन्यते। तस्मात् षष्टितमवर्षे विशेषपूजनं विधिवत् क्रियते। षष्टेः शान्तिः मार्कण्डेय-हवनेन भवति। तर्हि अस्माकं गुरुवर्याणां कृते तु तादृशी पूजा अतीव वैभवेन भवेत् इति सर्वैः ईप्सितम् ।

कार्लामठः नववधूरिव अलङ्कृत्य शुभावसराय सिद्धः जातः । वातावरणे सर्वे अलौकिक-आह्लादस्य स्पन्दनम् अनुभवितुं शक्तवन्तः ।

मार्कण्डेय-हवनस्य सिद्धता कार्तिक-शुक्ल-अष्टम्यां तिथौ एव आरब्धा। मठस्य अन्तः देव्याः दक्षिणभागे श्रीगणेशस्य पुरतः आकर्षक-मण्डलस्य सुन्दरी रचना निपुणैः अर्चकैः रचिता। सुशोभित-रङ्गवल्याः अविरल-रचना तु अत्यद्भुता । सूर्यदेवः स्वयं सप्ताश्वानां रथे उपविश्य गुरुवर्याणां स्वागतं कर्तुं भूमौ अवातरत् वा इति अभासत ।

शुक्लपक्ष-नवम्यां प्रातःकालतः यज्ञकुण्डम् अभितः उपविष्टार्चकानां वेदघोषमन्त्राणां मधुरध्वनिः सर्वत्र श्रुतः । तस्य श्रवणमात्रेण भक्ताः पुलकिताः हृष्टाश्च।

पूर्णाहुत्याः समये गुरुवर्याणाम् आगमनेन दिव्यदर्शनं प्राप्य अस्माभिः धन्यता अनुभूता। भवानीशङ्करदेवस्य कार्ला-दुर्गापरमेश्वरीदेव्याः च अनुग्रहेण अस्माकं गुरुवर्याः सुदीर्घकालं शान्तिसुखसमृद्धि-उत्तमारोग्यञ्च प्राप्नुयुः इति सर्वेषां साधकानां तथा भक्तानां च हृत्पूर्वकप्रार्थना ।





# सहस्रकलशाभिषेकः

– दुर्गा कुम्टा , मुम्बई

सहस्रकलशाभिषेकस्य नामैव भक्त्या समर्पणेन च सम्पृक्तम् । गुरुवर्यैः दत्तम् असीमितमार्गदर्शनार्थं, समाजोत्थानार्थकृतकार्यार्थं भक्तवृन्देन गुरुवर्यान् प्रति दर्शिता एषा आसीत् प्रीतिपूर्वक-कृतज्ञता। औचित्यमासीत् गुरुवर्याणां षष्ट्यब्दपूर्तिप्रीत्यर्थम् आयोजितः उत्सवः। कार्यकर्तृभिः निष्ठया उत्तमं नियोजनं कृतम्। कार्लामठे विघ्नहर्तुः पुरतः सुरचिताः सहस्रताम्रकलशानाम् आवलीनां दृश्यं तु मनोहारी आसीत् ।



सुन्दरं व्यवस्थापनं ननु। कलशेभ्य आरभ्य समाधिपर्यन्तं भक्तानां सुदीर्घ-आवलिः एकैकं कलशं हस्तान्तरितं कृत्वा समाधिपर्यन्तं गुरुवर्याणां हस्ते प्रापयितवान्। जलपूर्णसहस्रकलशाः !! शिवलिङ्गे अभिषेकम् आवर्षन्तः समाहितगुरुवर्याः समर्पणं कथं भवितव्यमेतस्य ज्वलत् उदाहरणमासीत् । गुरुसन्निधौ भक्त्या समर्पितान् अभिषेके निमज्जितान् च स्वामिवर्यान् दृष्ट्वा कृतकृत्याः जाताः सर्वे ।



अतुलनीयानुशासनेन विना एतत्तु असाध्यमेवासीत्। सर्वे भक्ताः तीर्थकलशप्रसादेन उपकृताः । गुरुशिष्य-मधुरसम्बन्धस्य स्मृतिः तु चिरकालमेव भक्तानां हृदये निवसिष्यति।

# गुरुमहिमा

– वृन्दा चन्दावर , मुम्बई

गुरुरेव तेजः
अज्ञानतिमिरनिर्मूलनाय ॥१॥

गुरुरेको मृदङ्गः
अनाहतनादप्रवेशाय ॥२॥

गुरुरेव ज्ञानम्
भयभवरोगनाशाय ॥३॥

गुरुरेका दीक्षा
भवसागरतरणाय ॥४॥

गुरुरेका तरङ्गिणी
प्राणस्य अविरतस्पन्दनाय ॥५॥

गुरुः सच्चिदानन्दः
आत्मस्वरूप-परिचयाय ॥६॥

गुरुरेकः वेणुमञ्जुलनादः
आत्मानन्द-निमज्जनाय ॥७॥

गुरुरेव अमृतम्
भक्तिरसपानाय ॥८॥

गुरोर्नाम कृपा
सच्छिष्योद्धाराय ॥९॥

गुरुरेक अक्षयामूल्यनिधिः
शाश्वत-परिपूरणाय ॥१०॥




# कनकाभिषेकः

– शीला कळावर, ठाणे







कनकाभिषेकः भारतीयसंस्कृतेः एकः प्राचीनः विधिः अस्ति । एषः संस्कारः राजभिः विद्वत्सम्मानाय, शिष्यैः च गुरुजनानां पूजनाय सम्पाद्यते । साहित्यिकाः च शिलालेखस्रोतांसि अस्मिन् सन्दर्भे ' कनकाभिषेकम् ' निर्दिशन्ति।

भारतस्य इतिहासे प्रसिद्धानि उदाहरणानि अस्मिन् सन्दर्भे वर्तन्ते । अप्पयदीक्षितस्य शिवङ्कमणिदीपिका नामकटीकायाः प्रशंसायां कृतः कनकाभिषेकः प्रसिद्धः अस्ति ।

एवं च तञ्जावूरस्य राजा रघुनाथः अपि संस्कृत-तेलुगुभाषयोः पाण्डित्ययुक्तः विद्वान् आसीत् । **तेन रचितेषु ग्रन्थेषु पारिजातापहरणम् , गजेन्द्रमोक्षः , नलचरितम् , अच्युतरायेन्द्राभ्युदयम् नाम केचन ग्रन्थाः** प्रशस्ताः सन्ति । इत्यतः सः कनकाभिषेकाय अर्हः अभवत् ।

कनकाभिषेकः नाम संस्कारः न केवलं विद्वज्जनानां सम्मानार्थम् अपितु गुरु-शिष्यपरम्परायाः च कृतज्ञतायाः प्रतीकः अपि वर्तते ।

गतमासे कार्लामठे अस्माकं गुरूणां षष्ट्यब्दपूर्तिमहोत्सवे अयं विधिः सोत्साहं संवृत्तः । साधकसङ्घेन उच्चण्डतया च भागः वोढः।

श्रीगुरुपादुकापूजनं कृत्वा क्रमशः पञ्च पञ्च परिवाराणां गणः श्रीगुरुचरणेषु स्वर्णनाणकम् अर्पयितुम् आवल्यां स्थितः । यदा अस्माकं क्रमस्य प्रतीक्षां कुर्वती अहं पङ्क्तौ स्थितवती, तदा मम मनः पञ्चविंशतिवर्षाणां स्मृतिं पुनः पुनः समागच्छत् यत्र परमपूज्यस्वामिनां मार्गदर्शनम् अनुभूतम् । प्रतिपदं ते अस्माकं सेवाभावं वर्धयितुं प्रोत्साहितवन्तः सेवायाः अनेकान् अवसरान् अपि दत्तवन्तः । एतत् सर्वं स्मृतवत्याः मम हृदये कृतज्ञताभावः पूरितः । अश्रूणां प्रवाहं यत्नेन निरुद्ध्य अस्माकं क्रमः प्राप्तः इति अवगतः ।

परमपूज्यानां चरणेषु एकं स्वर्णसिक्कं (नाणकम्) स्थापितं येन तेषां कृपां मार्गदर्शनं च प्रति आदरं प्रकटयेत् ।

एषः संस्कारः दोषानां गलनं, सेवायां कुशलतां च प्रकटयति । गुरूणां कृपया अधिकं सेवा-अवसरं प्रार्थयन्ति साधकाः । कृतज्ञताभावेन पूरितः स्वर्णमयः क्षणः चिरस्मरणीयः ।

गुरूणां च गुरुपरम्परायाः च सेवार्थं समर्पितं शरीरं स्वस्थं स्यात् इति प्रार्थना । एते अनुभवाः पद्येन वर्णयितुम् अशक्यम् एव किल । किं पुनः ?

# ललितकलाप्रस्तुतिः

**– कृष्णानन्द मङ्कीकर , मुम्बई**





अस्माकं परमपूज्यानां गुरुवर्याणां षष्ट्यब्दपूर्तिनिमित्तं कार्लाक्षेत्रे विलक्षणः समारोहः आयोजितः । एतस्मिन् अनेके कार्यक्रमाः सम्पन्नाः । अस्मिन्नुत्सवे ललितकलाप्रदर्शनं नाम एकः प्रस्तुतिस्तबकः आसीत् । विशिष्टाभ्यागतैः अतिथिकलाकारैः गुरुवर्याणां प्रति तेषां श्रद्धाभक्तिसुमनानि अर्पितानि ।



गुरुनन्दन-पडुकोण-महोदयेन सन्तूरवादनं प्रस्तुतम् । तस्य प्रस्तुतीकरणे तिस्रः कृतयः प्रस्तुतीकृताः । अस्माकं पुराणग्रन्थेषु शिवपार्वत्योः "कामेश्वर तथा कामेश्वरी" इति वर्णनं लभ्यते । प्रथमं गुरुनन्दन-महोदयेन "रूपक" ताले तारसप्तके यत् वादनं कृतं तदा साक्षात् कामेश्वरी नदीतीरे तालबद्धं नयनरम्यं नृत्यं करोति वा इति आभासः अभवत् । तदनन्तरं "त्रिताले" मध्यमगत्याम् अनुभूतमस्माभिः यत् कामेश्वरः कामेश्वर्याः नृत्यस्य प्रत्युत्तरं ददाति इति । तथा च तृतीया " द्रुत-त्रिताले" या कृतिः प्रस्तुता सा तु कामेश्वर-कामेश्वर्योः उभयोः युगपत् नृत्यमेव वा इति अनुभूतमस्माभिः । विलक्षणः अनुभवः आसीत् सः ।

विनायक-हेगडे-महोदयेन तस्य गायने पण्डित-भीमसेन-जोशी-महोदयस्य गानस्य पुनरानुभूतिः कारिता । तेन साकं पण्डित-योगेश-संशी-महोदयः तालवाद्यं गृहीतवान् तथा सुधीर-नायक-महोदयः संवादिनीवादनार्थमुपस्थितवान् च । तौ उद्दिश्य, हेगडे-महोदयेन उक्तम् "युवावस्थायाम् एतावतैः दिग्गजैः सह छायाचित्रणमेव अस्माकं प्रमुखा अभिलाषा आसीत्, तयोः मध्ये अद्य अहं गायनं कर्तुम् उपविष्टः । धन्योऽस्म्यद्य ।" एतावती विनयशीलता "विद्या विनयेन शोभते" इत्युक्तिं सार्थकीकरोति । अत्र योगेश-सुधीर-महोदययोः वादनमपि अपूर्वमेवासीत् ।

सदानन्द-नैम्पल्ली-महोदयेन तालवादनेन आमोदः प्रदत्तः । तेन वादनारम्भे तस्य गुरोः तारानाथ-महोदयस्य नामोल्लेखं कृत्वा , तं नत्वा , तेन रचिता एका कृतिः प्रस्तुता ।

स्वगुरुं नत्वा तेन अस्माकं गुरुवर्याणां प्रति भूरि भूरि कृतज्ञता प्रकटीकृता यत् तस्य कठिनसमये कथमस्माकं गुरुवर्याणामाशीर्वादैः एव सः तस्य अनारोग्याद्बहिरागतः इति । तस्य तालवादनेन एवं भासितं यत् तेन उच्चरिताः शब्दाः तस्य तालवाद्यं शब्दायते ननु । विलक्षणोऽयमनुभवः ।

धन्याः वयं यत् गुरुकृपया प्रथितकलाकाराणाम् अस्माकं गुरुवर्यान् प्रति असीमश्रद्धा अस्माभिः दृष्टा ।

अविस्मरणीय एव अयमनुभवः ।

# स्वर्णिमः अवकाशः

– **आशा अवस्थी , अहमदाबाद**

जीवने यत् किञ्चिदपि अस्माभिः प्राप्यते तस्य संविभागः आवश्यकः अन्यथा तस्य विकृतिः भवति इति अस्माकं गुरुवर्याणाम् उपदेशः। ते न केवलं सततं बोधयन्ति अपितु उपदेशस्य परिपालनं कर्तुम् अस्माकं कृते अवकाशान् अपि जनयन्ति । षष्ट्यब्दपूर्त्युत्सवः अपि तथैव एकः अप्रतिमः अवसरः आसीदिति मन्ये ।

एतस्मिन् उत्सवे अहं प्रथमवारं पूजासमित्यां सम्मिलिता आसम् । एषः अवसरः मम कृते अतीव शैक्षणिकः आसीत् ।

आदिनं वयं सततं व्यस्ताः आस्म। प्रतिदिनं न केवलं नूतनकार्यम् अपितु स्वयंसेवकानां भिन्ना उपलब्धता! तथापि सर्वाणि कार्याणि अविलम्बेन कथं सम्पन्नानि तत् तु महदाश्चर्यमेव ! तदर्थम् अन्यैः गणैः सह कीदृशः सौष्ठवपूर्णः सहयोगः आवश्यकः इत्यपि अस्मिन् अवसरे निर्बाधतया स्फुटम् अभवत् । यज्ञस्य कृते पुष्पाणि, विशेष-कनकाभिषेक-प्रसादसिद्धता, पादुकापूजनस्य कृते पुष्पगुच्छबन्धनं, श्रीभिक्षाप्रसादसिद्धता इत्यादिषु कार्येषु मुख्यसञ्चालिकायाः निर्देशनानुसारं सिद्धतां कृत्वा अस्माभिः निःसंशयं कुशलता प्राप्ता।

वाक्-संयमस्य अभ्यासार्थे एषः अवकाशः समुचितः येन नकारात्मकभावनानां प्रकटनमपि प्रीत्यादर-व्यवहारेण दुष्करमभवत्।

अस्माभिः सम्यक् ज्ञातं यत् गणस्य प्रत्येकसदस्यः यदि निस्वार्थतया प्रयत्नं परिश्रमञ्च करोति, तदानीमेव सफलता शक्या। वस्तुतः एतावते विशाले कार्यक्रमे कस्यचित् गणस्य कठिननेतृत्वं परस्परसहयोगेनैव साध्यम् !

अत एव गुरुवर्याः पुनः पुनः अस्मान् सेवां कर्तुं प्रचोदयन्ति यतः सेवया एव अस्माकं चित्तशुद्धिः शक्या , अस्माकं नकारात्मकं चिन्तनं सकारात्मकं भवितुं शक्यते । सत्यम् , यत् किञ्चिदपि गुरुवर्येभ्यः प्राप्तं तत्सर्वं हितप्रदः प्रसादः एव ! सेवायाः अवसरः अपि नैव भिन्नः ! ईदृशः स्वर्णिमः अवकाशः सर्वैः लब्धव्यः इति प्रार्थये !

# निवासयोजना

– **पद्मिनी बल्सेकर, मुम्बई**

अस्माकं परमपूज्य-गुरुवर्याणां षष्ट्यब्दपूर्त्युत्सवसमये कार्लामठे देशपरदेशतः बहवः साधकाः अपेक्षिताः । तेषां निवासव्यवस्था एकं महत्वपूर्णं कार्यम् । उत्सवस्य निमन्त्रणेन सह निवासाभिलाषिणां कृते एकं गुगलप्रपत्रकं समाविष्टम् आसीत्। सर्वेषां जनानां मठपरिसरे स्थिते परिज्ञानसहवासे निवासव्यवस्था तु असम्भवैव । अतः मठस्य निकटस्थितेषु अन्यपथिकाश्रमेषु साधकानां निवासव्यवस्था कृता । ये जनाः मठपरिसरात् बहिः वसन्तः आसन् तेषां कृते परिवहनस्य व्यवस्थापि कृता । पथिकावासतः साधकानां परिवहनस्य कृते एकः स्वयंसेवकः नियुक्तः । सर्वेषां साधकानां निवासः सुखकरः भवेदिति उत्सवाधिकारिणां प्रयत्नः आसीत् । एतस्मिन् गटे बहुशः युवास्वयंसेवकाः आसन् । युवास्वयंसेवकैः सह कार्यकरणं तु अतीव मोददायकमासीत् ।

अतिथयः कस्मिन्नपि समये अपेक्षिताः । अतः गटस्य प्रत्येकः सदस्यः सदैव आनन्देन कार्ये व्यस्तः । एतस्मिन् महति उत्सवे अहं एतस्मिन् गटे कार्यं कर्तुं शक्तवती एतत् मम सौभाग्यमित्यहं मन्ये ।

# नृत्यप्रस्तुतिः

**लेखः - डॉ. राम सारस्वत , बीकानेर**
**अनुवादः - नीलोत्पला , जोधपुर**
**नेहा गोस्वामी , जोधपुर**



श्रीचित्रापुरमठाधिपति-परमपूज्य-श्रीमत्-सद्योजातशङ्कराश्रम-स्वामिनः षष्ट्यब्दपूर्त्युत्सवः भव्यदिव्यरूपेण आचरिष्यति इति श्रुतम्। एतस्य आयोजनस्य साक्षिणं भवितुं गुरुसेवां कर्तुञ्च अस्माभिः शिवसायुज्य-सङ्घेन सह सम्पर्कं साधयित्वा लघुसेवायाः अवसरोऽपि प्राप्तः।

अस्माकं त्रयोदशसदस्यीयदलः सायङ्काले नवम्बर- त्रयोदशदिनाङ्के कार्लामठं प्राप्तः।

परेद्युः सायङ्काले अस्माकं प्रथमप्रस्तुत्यां युवत्यः गुरुवन्दनां गणेशवन्दनां तथा राजस्थानीसंस्कृतेः संक्षिप्तपरिचयं नृत्यरूपेण प्रस्तुतं कृतवत्यः ।

अस्माकं द्वितीया प्रस्तुतिः आसीत् राजस्थानस्य सुप्रसिद्ध-गणगौरपर्वणः नृत्यम्।

अनन्तरं राजस्थानस्य प्रसिद्धं ' घूमरः' इति राज्यनृत्यं प्रस्तुतम् ।

कार्यक्रमस्य अन्ते भगवते श्रीकृष्णाय भावपूर्णगीतस्य नृत्यप्रस्तुत्या समर्पणम् अभवत्।

सर्वेषां दर्शकानां करताडनेन नृत्यप्रस्तुतीनां कृतप्रशंसया युवतीनां मनोबलं संवर्धितञ्च। ईदृश्यां महति मञ्चे अस्माकं युवतीनामासीत् प्रथमानुभवः। मठेन दत्तेन उपहारेण तासाम् उत्साहः द्विगुणितः जातः।

कार्यक्रमस्य सूत्रसञ्चालनस्य तथैव नृत्यसम्बद्धित-इतिहास-विवरणस्य अवसरः मया प्राप्तः। धन्यो जातोऽहम्।

सायङ्काले यदा वयं परमपूज्यस्वामिनं मिलितवन्तः तदा स्वामिना प्रसन्नतया सर्वेभ्यः आशिषः प्रदत्ताः तथा च आदिष्टं यत् सर्वेषु आयोजनेषु अस्माकं सहभागः भवितव्यः इति।

अस्माकं एषा लघुसेवा प्रीत्या गुरुचरणयोः समर्पिता।





# पुस्तकविमोचनम्


– सुधा कार्नाड , बेङ्गलूरु

परमपूज्य-सद्योजात-शङ्कराश्रम-स्वामिवर्याणां षष्ट्यब्दपूर्ति-महोत्सवस्य समये पुस्तकद्वयस्य विमोचनमभवत् ।

'हृल्लेखा' इति गुरुमात्रा स्वहस्तेन लिखितानां तथा 'परिप्रश्नः' इति परमपूज्य-स्वामिवर्यैः लिखितानां लेखानां प्रकाशनं जातम् । ' हृल्लेखा ' पुस्तके गुरुमातुः जीवने घटितानां केषाञ्चन-अमूल्य-क्षणानाम् उल्लेखः अस्ति ।

' परिप्रश्नः ' इत्यस्मिन् स्वामिवर्यैः तेषां संन्यास-जीवनस्य केषाञ्चन अविस्मरणीय-अनुभवानां विवरणं कृतम् अस्ति । एते लेखाः तु अस्माकं कृते उद्बोधकाः सन्ति ।

द्वितीय-पुस्तकं ' शिवसायुज्यम् ' स्वामिनां चरणकमलयोः अस्माकं समाजस्य भक्तैः प्रीत्यादरेण अर्पितं कुसुमम् अस्ति। अस्मिन् पुस्तके शिवस्य षष्टिः कथाः सन्ति। एतत् पुस्तकं न केवलं बालानां कृते अपितु सर्वेषां कृते उपयोगाय अस्ति। एतस्मिन् विविध-विषयाणाम् अनुसन्धानं कृत्वा शिवस्य षष्टिः कथाः एकीकृत्य सचित्रं मुद्रिताः सन्ति । प्रतिगृहम् अस्य पुस्तकस्य एका प्रतिकृतिः अवश्यं भवेत्।






बालरञ्जनी

# शब्दपटः

– शिल्पा मुद्गूर , मुम्बई

**षष्ट्यब्दपूर्ति-उत्सवे विमोचिते 'शिवसायुज्यम्' नाम्नि पुस्तके शिवस्य षष्टिः कथाः सन्ति । ताः कथाः पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि शब्दपटे अन्विष्यतु ।**

१ शिवस्य अनादि-अनन्त-रूपस्य प्रतीकम् ।





८ शिवावाहनस्य नन्दिकेश्वरस्य जनकः ।



२ शिवस्य प्रियं पुष्पम् ।



७ २७ नक्षत्राणां पतिः ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| भ | शि | वा | प्रि | द | श | रू | क्ष |
| ज | अ | र्ध | ना | री | श्व | रः | की |
| लि | र्क | गो | दा | त | बि | ल | र्ति |
| पा | पु | मा | अ | प | स्मा | रः | मु |
| भ | ष्प | हि | क | सः | न | भ | ख |
| गी | म् | ल | शि | व | लि | ङ्ग | म् |
| र | अ | न | ला | क | पो | ग | ण |
| थः | न्दि | इ | दः | नि | म् | च | न्द्रः |



३ दक्षिणामूर्ति-शिवस्य पादतले भवति एषः राक्षसः ।



६ गङ्गां भूलोकम् आनेतुं दीर्घां तपश्चर्यां कृतवान् सः ।

४ शिवशक्तेः ऐक्यं दर्शयमाणं रूपम्



५ देवालयस्य वा गृहस्य वा द्वारे दृश्यते एतत् मुखम् ।



( उत्तराणि २७ पृष्ठक्रमाङ्के दत्तानि )

# सुदिनं सुदिनम्

(स्वामी परिज्ञानाश्रम-दिव्याङ्ग-पाठशालाकृता प्रस्तुतिः)

**– कृष्णानन्द मङ्कीकर , मुम्बई**

विरारग्रामे स्थिता एषा दिव्याङ्गछात्राणां कृते पाठशाला केवलम् अस्माकं परमगुरु-श्रीमत्परिज्ञानाश्रम-गुरुवर्याणां सङ्कल्पस्य प्रभावेण कार्यान्विता सञ्जाता ।

अस्यां शालायां सर्वे विद्यार्थिनः केनापि न्यूनत्वेन ग्रासिता एव । केचन मूक-बधिराः, केचन मन्दबुद्धियुक्ताः इत्यादयः । किन्तु तेषां यत्संवर्धनं सङ्गोपनमत्र भवति तेन ते सर्वे भविष्यकाले स्वीयमायुष्यं स्वसामर्थ्येन जीवितुं शक्नुयुः इति पाठशालायाः प्रशासनस्य स्तुत्यः प्रयत्नः ।

परमपूज्यैः परिज्ञानाश्रम-गुरुवर्यैः शालाकार्यकारिणीसम्मुखे एका **दृष्टिः (Vision)** प्रदत्ता आसीत् , **" बालानाम् असामर्थ्ये सामर्थ्यं तथा अयोग्यतास्थाने योग्यतां पश्यामः । "** बीजरूपेण संस्थापितः प्रयत्नः गुरुकृपया इदानीं फलीभूतो दृश्यते ।

अस्माकं गुरुवर्याणां षष्ठ्यब्दपूर्ति-उत्सवप्रसङ्गे विविधनृत्यप्रकाराणां विविधैः विद्यार्थिगणैः या विलक्षणा प्रस्तुतिः कृता , सा तु अस्माकं स्मरणे चिरकालं स्थिता भवेदिति मन्यामहे ।

यदा वयं तेषां नृत्यानि पश्यन्तः आस्म तदा एको हि प्रश्नः सर्वेषां मनसि उद्भूतः यत् किं न्यूनमस्ति एतेषु ? विलक्षणोऽयं चमत्कार एव ।

प्रथमतः गुरुस्तुत्या आरब्धः कार्यक्रमः तदनन्तरं, छात्रैः गणेशस्तुतिः , तथा देवीस्तुतिः प्रस्तुता । तत्पश्चात् , छात्रैः परमपूज्यानां परिज्ञानाश्रमगुरुवर्याणाम् अतीव सरलं सुमधुरं स्तुतिपरं गीतं " ज्ञानानन्दा तव शरणम् " इति प्रस्तुतम् ।

तदनन्तरं, **" सुदिनं सुदिनं जन्मदिनम् "** इति अतीव सुमधुरं गीतं प्रस्तुतम् ।





हस्तधृतदीपैः सह इदमतीव शोभनं नृत्यं प्रस्तुतं तथा च अन्ते शुभाशयान् दर्शयितुमेकः वस्त्रफलकोऽपि दर्शितः सर्वैः ।

तत्पश्चात् ये "मतिमन्दाः" इति ज्ञाताः – **वस्तुतः तान् " मतिमन्दाः " इत्युक्तवन्तः वयमेव क्षीणबुद्धयः वा इति चिन्तनं युक्तमेव ।** तैः त्रिभिः गीतैः प्रस्तुता राधाकृष्णयोः केलिः आत्यन्तिकमनोहारिणी आसीत्। छात्राणां भावप्रकटनं तु अतीव मनोज्ञमेव।

अनन्तरं कर्णबधिर-मूकछात्रैः प्रस्तुतं महाराष्ट्र-प्रदेशस्य जेजुरीग्रामस्थखण्डोबादेवस्य स्तुतिपूर्वकनृत्यं तु अद्वितीयमेव यतः ते एकमपि स्वरं श्रोतुं न शक्नुवन्तः किन्तु एतैः एकमपि हस्त-पदविक्षेपः न विषमीकृतः । तैः मनसि सङ्ख्यागणनां कृत्वा पदन्यासाः हस्तविक्षेपाः च कृताः इत्यस्मान् कथितं सूत्रधारेण । नृत्यान्ते, तैः अश्वारूढः खण्डोबादेवः क्षणार्धात् दर्शितः तद्विलक्षणमेव दृश्यम् । छात्रा एव अश्वा अभवन् । अश्वस्य मुखमपि दर्शितं तैः ।

तत्पश्चात्कृषकसमर्पितं नृत्यं छात्रैः प्रस्तुतम्। कृषकयुगलस्य क्षेत्रे बीजवपनं, पक्षिनिवारणं , कृषकभार्यायाः जलबन्धस्योपरि स्थित्वा पत्युः आह्वानं, वृषभयुगलम् इत्यादयः विषयाः अतीव कुशलतया सन्दर्शिताः ।

अद्भुता अपितु केवलमभूतपूर्वा प्रस्तुतिः । यैः सर्वेषां नृत्यानां संयोजनं कृतं, छात्राणाम् अभ्यासः कारितः सङ्गीतनियोजनं कृतं ते सर्वे अभिनन्दनपात्रा एव किन्तु , या कार्यक्रमस्य सञ्चालिका आसीत् तया अपि अतीव सयुक्तिकाः सुवचनैः युक्ताः उद्घोषणाः कृत्वा कार्यक्रमस्य शोभा वर्धिता । सापि कार्यक्रमस्य अन्ते भावविभोरा सती, अश्रूणि रोद्धुमसमर्था एव । यदि वयं सर्वे प्रेक्षकाः साश्रुनयनाः तर्हि आश्चर्यं वा?

धन्याः वयं यत् गुरुकृपया एतावतं छात्राणां समुद्धरणं दृष्टवन्तः । विरारक्षेत्रस्थितानां दिव्याङ्गछात्राणां कृते यत्कार्यम् इयं पाठशाला करोति तदभिनन्दनीयमेव ।



# ग्रामसन्तर्पणम्

– विमला होन्नावर , बेङ्गलूरु

कार्लानगर्यां श्रीसद्योजात-शङ्कराश्रम-गुरुवर्याणां षष्ट्यब्दपूर्ति-कार्यक्रमार्थे दशदिनपर्यन्तं जनानां साधकानां च सम्मर्दः आसीत् ।

प्रातःकालतः मन्दिरे भवानीशङ्कर-सुप्रभातस्तोत्रं गुरुपादुकास्तोत्रं , श्रीपरिज्ञानाश्रमत्रयोदशी स्तोत्रं , गुरुभजनस्तोत्रं , देवीकवचादयः स्तोत्राणि अनुष्ठानम् , अष्टावधानं , होम-हवनानि तथा कैलाससभामण्डपे विविधाः मनोरञ्जनकार्यक्रमाः प्रचलन्तः आसन् ।

द्वादश-दिनाङ्के मध्याह्ने अभवत् ग्रामभोजनम् । सर्वतः ग्रामीणजनानां , साधकानां , परिज्ञानाश्रम-पाठशालायाः छात्राणाम् अध्यापकानाञ्च सम्मर्दः आसीत् । छात्राः तथा अध्यापकाः देव्याः मन्दिरस्य पुरतः पङ्क्त्याम् उपाविशन् ।



प्रथमतः स्वामिनः उपस्थित्यां परिज्ञान-सहवासपुरतः परमगुरुवर्याणां भावचित्रस्य पुरतः दीपप्रज्वालनं तथा श्रीपरिज्ञानाश्रम-त्रयोदशी-स्तोत्रस्य पठनं सञ्जातम् । अनन्तरम् एव ग्रामभोजनस्य परिवेषणम् आरब्धम् ।

भोजनार्थम् उत्तमा व्यवस्था आसीत् । परिवेषणे नैके स्वयंसेवकाः रताः तथा तस्मिन्नेव समये साधकाः एकैकशः अग्रे आगत्य उच्चैः श्लोकपठनं कृतवन्तः । सर्वत्र आनन्दमयं वातावरणमासीत् । जनौघः निरन्तरम् आगच्छन्नासीत् । आकण्ठं यथेष्टं तृप्तिकरं नानाविधव्यञ्जन-मिष्टान्नयुक्तभोजनम् आस्वाद्य जनाः सानन्दं अगच्छन् । बालकाः तु पुनः पुनः पूरिका-दालीतॉयं स्वीकृतवन्तः। पाकशालायां भोजनव्यवस्था अपि सम्यक् आसीत् । एतत् तु देवी-दुर्गायाः तथा स्वामिनः कृपया एव साध्यम् ।

अन्ते तत्रस्थिताः वयं सर्वे स्वामिनः आशीर्वचनानि श्रोतुकामाः आस्म । तदनन्तरं परमपूज्यगुरुवर्याणां दिव्यहस्ताभ्यां वयं सर्वे प्रसादरूपेण कुण्डलिकाम् अपि प्राप्तवन्तः धन्यतामनुभूतवन्तः च।



# संवित्-सुधा

– **वैशाली नाडकर्णी , पुण्यनगरी**

उत्तरकर्णाटकस्य शिरालीनगरे चित्रापुरग्रामे परमपूज्य-श्रीमत्सद्योजातशङ्कराश्रमस्वामिनः मार्गदर्शनेन आशीर्वादेन च आरब्धा संवित्-सुधा महिलासशक्तिकरणस्य एकः उपक्रमः। संवित्-सुधा न तु केवलं ग्रामीणमहिलाभ्यः आर्थिकस्वतन्त्रतां प्रददाति अपितु स्वस्य गृहदायित्वस्य सन्तुलनं कुर्वत्यः ताः स्वसृजनशीलतां प्रकटयितुम् आत्मविश्वासं प्राप्नुवन्ति ।

संवित्-सुधायाः असङ्ख्य-उत्पादानां विक्रयणार्थे अस्मिन् उत्सवे विशाल-वातानुकूलित-कैलाससभा-मण्डपे स्थानं दत्तम् । संवित्-सुधायाः स्वयंसेविकाः उत्पादानां प्रदर्शनम् एतावत् सुन्दररीत्या कृतवत्यः यत् कार्यक्रमान् द्रष्टुं ये जनाः आगतवन्तः ते सर्वे एतत् स्थानं प्रति आकृष्टाः अभवन् । केचन न केवलं स्वस्य कृते क्रीणन्ति स्म अपितु स्वमित्रेभ्यः, स्वबान्धवेभ्यः च उपहारं दातुं क्रीणन्ति स्म । एतान् अद्भुतान् उत्पादान् निर्मायमाणानां महिलानां कौशलस्य प्रशंसां कुर्वन्ति स्म । एतत् तु ग्रामीणमहिलानां कृते अतीव आनन्ददायकम् उत्साहवर्धकं च ।

अस्मिन् उत्सवे संवित्-सुधायाः असङ्ख्य-उत्पादानाम् अतीव  उत्तमविक्रयणम् अभवत् ।

# दुग्धशर्कराऽवकाशः

– **शरयु हळदीपुर , मुम्बई**

अस्माकं परमपूज्य-गुरुवर्याणां नवदिवसीय-षष्ट्यब्दपूर्तिउत्सवे प्रतिदिनं  श्रुतः एषः ध्वनिः मम कर्णपथे अद्यापि गुञ्जन् अस्ति  ..." एकादशवादनतः एकहोरापर्यन्तं कैलास-सभामण्डपे सर्वेषां कृते सम्भाषणवर्गः प्रचलन् अस्ति ...समागच्छन्तु त्वरया ...!"

संस्कृतप्रचारकार्ये निरतेभ्यः , स्वयंसेवकेभ्यः-स्वयंसेविकाभ्यः , संस्कृतानुरागिभ्यः अधीतृभ्यः च सम्भाषणवर्गाः यादृशं विश्वासं , प्रोत्साहनं , स्फूर्तिं च ददति तादृशं न अन्यत्र कुत्रापि दृश्यते इति मम मतिः।

संस्कृतसम्भाषणसत्रे अर्थबोधाभिनयपूर्णकथाभिः, चाटुश्लोकैः, विनोदकणिकाभिः, गीतैः, सुभाषितैः क्रीडादिभिः समुदाचारैः संस्कृतमयवातावरणं जनयितुं सुलभं जातम् । व्याकरणस्य नियमाः ईदृशाः ज्ञात्वा अज्ञात्वा वा अनायासेन शिक्षितुं शक्यन्ते इति अवगम्य सर्वेषाम् अपारसन्तुष्टिरभवत् । एतेन परस्पराणां मध्ये स्थितम् अन्तरं न्यूनीभूतम् । सर्वेषां लाभोऽभवत् ।

सर्वे निस्सङ्कोचं सम्भाषणवर्गे सहभागं कृतवन्तः। दैनन्दिनलोकव्यवहारेषु उपयुक्ता शब्दावलिः कियती सुलभतया क्रीडया अधीतुं शक्या ! सम्भाषणवर्गाः सर्वेषां कृते महते लाभाय सन्तोषाय च ।

गीर्वाणभाषायाः प्रसारे सम्भाषणवर्गः तु मेरुदण्डः इव । अस्माकं गुरुवर्यैः स्नेहेन, तेषां मार्गदर्शनेन आशीर्वादेन च वर्धितः पोषितश्च संस्कृतसम्भाषणवर्गः षष्ट्यब्दपूर्त्युत्सवे ईदृशः सम्पन्नः , श्रीगुरुचरणयोः समर्पितः च ।

# अभिज्ञानशाकुन्तलम्

– गौरी येन्नेमडी, मुम्बई




अभिज्ञान-शाकुन्तलम् इति उच्चारणेन मम मनः महाविद्यालयीन-द्वितीयवर्षे प्रविष्टं यस्मिन् मम अत्यन्तरोचकः ' अभिज्ञान-शाकुन्तलम् ' इति ग्रन्थः मया पठितः । अतः पूज्यगुरुवर्याणां षष्ट्यब्दपूर्ति-उत्सवे विविधकलाकार्यक्रमेषु तस्य समावेशः भविष्यति इति श्रुत्वा मम मोदः असीमितः अभवत् ।

केनचित् अपरिहार्य-कारणेन मम कार्लागमनम् अशक्यम् इति खेदः आसीत् । किन्तु इदानीं पूज्यगुरुवर्याणाम् अनुग्रहेण श्रीचित्रापुर-मठस्य अन्तर्जालप्रसारणे अभिवृद्ध्याः कारणात् स्वगृहादेव विविधकार्यक्रमाणां दर्शनलाभः शक्यः जातः भोः । अतः नाटिकायाः सादरीकरणस्य अतीव आतुरतया मम प्रतीक्षा आसीत् यतः केवलं पठनात् अभिनयस्य आस्वादः गुरुतरः खलु ।

नोव्हेम्बरमासस्य १४ दिनाङ्के सायङ्काले निर्दिष्टितसमये उपोद्घातभाषणेन कार्यक्रमस्य प्रारम्भः अभवत् । तम् अन्ववर्तत संवादरूपेण कृतः नाटिकायाः उत्कृष्टरसास्वादः यः प्रेक्षकाणां कुतूहलम् अवर्धयत् । पश्चात् नूतनरूपेण कृतः नान्दिकार्यक्रमः यस्मिन् मधुरगीतेन सार्धम् आसीत् सुन्दरः नृत्याविष्कारः ।

एषा नाटिका शिक्षकवर्गेण छात्रैः च मिलित्वा सादरीकृता । तेषां वेषभूषा तु एतावती अनुरूपा उत्तमस्तरीया युक्ता च आसीत् यत् नटः कः वा नटी का अस्ति इति अभिज्ञातुं क्षणमात्रं प्रेक्षकाणां सम्भ्रमाय एव ! रङ्गमञ्चस्य LED माध्यमेन रचितं पृष्ठव्यवधानं तु अतीव प्रात्यक्षिक-निसर्गानुभवम् अददात् ।

एतस्मिन् वातावरणे अहं तु काल्पनिकरूपेण काश्यप-आश्रमं प्रवेशं कृतवती । कविकुलगुरु-कालिदासस्य भावनाप्रद-कथायाः प्रमुखचतुश्लोकानां सारस्य प्रदर्शीकरणं दृष्ट्वा मम नेत्राभ्याम् अनवरत-अश्रुप्रवाहः प्रारभत ।

भविष्यकाले अपि एतादृशाः कार्यक्रमाः भवेयुः इति आशये ।





# ललिता-सहस्रनाम-हवनम्

– **शीतला चन्दावर , मुम्बई**

अस्माकं गुरुवर्याणां षष्ट्यब्दपूर्ति-उत्सवे प्रतिदिनं साधनायुक्तम् आसीत् । संस्कृतसम्भाषणं, नाट्यनृत्यमपि प्रचलति स्म । एतेषु कार्यक्रमेषु यज्ञानां महत्योगदानम् ।

मम पतिः ललितासहस्रनामहोमार्थं यजमानसेवां दत्तवान्। अहम् एतं होमं मङ्गळूरे चातुर्मासे दृष्टवती । परन्तु तस्मिन् सहभागः प्रथमवारः । ' किं करणीयं किं न' इति मम मनोदशा । होमस्य कृते देव्याः भव्याकृतिः मिश्रवर्णैः चूर्णैः मन्दिरे भूम्यां रचिता आसीत् । नैके वैदिकाः तत्र आगतवन्तः । प्रधानवैदिकस्य निर्देशात् वयं यजमानदम्पतयः देव्याः रचिताकृत्याः पार्श्वे उपविश्य सङ्कल्पविधिं कृतवन्तः । पश्चात् वयं होमकुण्डस्य पुरतः एकत्रिताः जाताः । पुरुषाः कुण्डं परितः उपविश्य अर्चकादिष्टविधिं कृतवन्तः । महिलाः कुण्डस्य पुरतः उपविश्य मन्त्रोच्चारणस्य आनन्दं लब्धवत्यः । पूर्वं कुङ्कुमार्चनस्य समये अहं ललितासहस्रनामानि नमो युक्तानि उक्तवती । परन्तु अत्र नमश्शब्दस्य स्थाने स्वाहा इति पदस्य प्रयोगः अभवत् । केवलं पदपरिवर्तनं न । प्रत्येकस्वाहायुक्तनाम अलौकिकरीत्या उच्चारितम् । द्वौ वैदिकौ युगलपद्धत्या एकैकं ललितानाम घोषितवन्तौ । वैदिकमन्त्रोच्चारस्य द्वन्द्वम् इव भाति । तस्य श्रवणस्य आनन्दः कथं वर्णनीयः । मम मानसिकाहुतिः यज्ञे सहसा भवन्ती आसीत् ।

अष्टदिवससाधनमयः कालावासः कदा समाप्तः न ज्ञातवती एव । तादृश्याः व्यवस्थायाः कृते अहं स्वयंसेवकानाम् ऋणी अस्मि । अपि सर्वोपरि गुरुवर्याणाम् अनुग्रहार्थाय ऋणी अस्मि येन उत्सवः सफलीभूतः।





# कुमारिका-पूजनम्

– सुजाता हळदीपुर , मुम्बई

नार्यः सदैव पूजनीयाः इति अस्माकं मान्यता यतः पुराणेष्वपि स्त्रीणां महत्त्वं दर्शयन्ति उदाहरणानि नैकानि सन्ति खलु । एतस्य प्रात्यक्षिकम् अस्माकं कार्लामठे षष्ट्यब्दपूर्त्युत्सवे पुनरेकवारं द्रष्टुम् अवसरः प्राप्तः । नोव्हेम्बरमासस्य एकादशदिनाङ्के कुमारिका-पूजनम् अभवत् ।

परिज्ञानविद्यालयतः नव-निरागस-पञ्चवर्षीयबालिकानां देवीरूपेण पूजनम् अभवत् । किन्तु ताः तु पाठशालायाः गणवेशधारिताः पूजनस्य प्रतीक्ष्यमाणाः मुग्धाः कुमारिकाः ननु ।

तेषां कोमललघुचरणकमलानां प्रक्षालनं , गन्धकुङ्कुमपुष्पैः पूजनम् , अनन्तरं नीराजनं कृत्वा ताभ्यः विविधवस्तूनाम् उपहारः दत्तः । स्वयं परमपूज्यस्वामीवर्यैः बालिकासु तासाम् अत्यन्तप्रियचाकलेहस्य उपहारः वितरितः । अन्ते गुरुवर्याणामनन्तरं कुमारिकाणां चरणकमलेषु प्रणामं कृत्वा ताभ्यः आशीर्वादं गृहीत्वा भक्ताः आत्मानं धन्याः अमन्यन्त । एतस्मिन् समये एताः मधुराः किञ्चित् लज्जिताः किञ्चित् चटुलाः बालिकाः न किन्तु साक्षात् देव्यः ।

ईदृशः आसीत् षष्ट्यब्दपूर्ति-उत्सवस्य एकः अविस्मरणीय अनुभवः ।



# विशेषकार्यक्रमाः

– सुधा कार्नाड, बेङ्गलूरु

अस्माकं सौभाग्यमेव यदा १९९७ तमे वर्षे मठाधिपत्यं स्वीकृत्य परमपूज्य-सद्योजात-शङ्कराश्रम-स्वामिवर्याः अस्मान् उपकृतवन्तः।

अस्माकं संस्कृतेः पालनार्थं वर्धनार्थं च तेषां बृहत् योगदानम् अस्ति । तेषां दूरदृष्टेः कारणात् बालानां कृते 'प्रार्थना' वर्गः आरब्धः येन बाल्यादेव ते अस्माकं धर्मस्य तथा तस्य पालनस्य विषयान् जानीयुः तथैव मठेन सह ते सम्बन्धिताः भवेयुः इति ।

युवानां कृते 'युवधारा' अपि स्वामिनाम् एव सङ्कल्पः । एतेन साधिता परमपूज्य-परिज्ञानाश्रमगुरुवर्यैः युवकानां कृते स्थापित-सीमा (CYMA)-सङ्घटनस्य अभिवृद्धिः। अस्माकं समाजस्य युवक-युवतीषु धैर्यम् आत्मबलम् इत्यादीनां वर्धनमेव युवधारायाः मुख्यः उद्देशः ।

अवशिष्टाः वयोवृद्धजनाः । तेषां विषये स्वामिनः न चिन्तयन्ति वा ? अवश्यं चिन्तयन्ति । वयस्कानां कृते स्वाध्यायाः स्तोत्रपठनम् इत्यादीनि सन्ति एव । स्वामिवर्यैः चैतन्य गुलवाडी महोदयः 'धर्मप्रचारकः' इति आयुक्तः ।

अस्मिन् महोत्सवे प्रार्थनावर्गस्य छात्रैः युवधारायाः युवाभिः च भिन्न-भिन्न-कार्यक्रमैः कृतज्ञताभावेन स्वामिनः प्रति प्रीतिपूर्वकम् आदरः प्रदर्शितः।

प्रार्थना वर्गस्य छात्रैः ' प्राप्तं प्राप्तम् उपासीत ' इति नाटकं प्रस्तुतम् । अतीतजन्मसु अस्माभिः कृत-कर्मणां फलरूपेण एव वयम् इहजन्मनि सुखं वा दुःखं वा प्राप्नुमः। किन्तु अस्मिन् जीवने पुण्यफलप्रभावात् उज्ज्वल- गुरुपरम्परायाः मार्गदर्शनम् अस्माभिः प्राप्तम् । एतत् अनुसृत्य जीवनं सफलं करणीयम् - इति गहनविषयः सुधीर-बळवळ्ळी-महोदयेन तस्य लेखन-निर्देशनात् सहजतया प्रतिपादितः। रोचका आसीत् एषा प्रस्तुतिः।











युवधारायाः युवाभिः प्रस्तुतीकृतायां नाटिकायाम् एका मनोवैज्ञानिका वैद्या रोगिणां चिकित्सां सङ्गीतद्वारा कथं करोतीति दर्शितम् । नाटिकायां सङ्गीतम् अतीव सुश्राव्यमासीत् ।

अस्माकं धर्मप्रचारक-चैतन्य-महोदयस्य कीर्तनमपि आयोजितमासीत् यत् उद्बोधकम् आह्लादकरं च आसीत् ।

दक्षिणभारते सप्तमे शतके द्विसप्ततिः नयनाराः ये शिवभक्ताः आसन् - तैः नैकानि तेवाराणि रचितानि। (तेवारम् इत्युक्ते स्तोत्राणां माला। ) द्विसप्ततीषु नयनारेषु ' बालशिवभक्तः ज्ञानसम्बन्दर् ' नाम अस्ति एकं तेवारम् । चैतन्य महोदयः ज्ञानसम्बन्दर्-विषये कथाकथनं कृतवान् । तेवाराणां गानेन सम्पूर्ण- कथाकथनं श्रोतॄणां मनांसि अहरत् ।





# सम्पूर्ण-भगवद्गीतापठनम्

– **कुमुद कुळकर्णी, मुम्बई**

नोव्हेम्बरमासस्य १६तमे दिनाङ्के कैलासमण्डपे सर्वैः साधकैः समर्पिता सम्पूर्णभगवद्गीतापठनसेवा अद्भुता एव । प्रत्येकसभातः साधकैः एकैकस्य अध्यायस्य पठनं कृतम् । ध्वनिवर्धके एकस्य साधकस्य नेतृत्वयोगेन सर्वे सुन्दररीत्या सुस्पष्टतया सामूहिकपठनम् अकुर्वन् । साधकानाम् उत्साहः तु स्पृहणीयः एव। ईदृशेन उच्चैः गीतापठनेन मण्डपे सर्वतः प्रसृतैः प्रबलस्पन्दनैः वातावरणं भक्तिपूर्णम् अभवत् । मनः प्रसन्नतायाः अनुभवं कुर्वत् आसीत् । भगवद्गीतायाः केवलं पठनेन कीदृशः मनसि प्रभावः भवति अस्य वयं सर्वे अनुभवं कर्तुं शक्तवन्तः। परमपूज्यगुरुवर्याणाम् अनुग्रहेण एतत् पठनं सुन्दररीत्या सम्पूर्णम् अभवत् यस्मिन् अहम् अपि भागं वोढुं शक्तवती एतत् तु मम परमभाग्यम् । अस्माकं परमपूज्यगुरुवर्येभ्यः सप्रेमनमस्काराः ।

# गुरुपूजनम्

– सङ्गीता पवार , मुम्बई





श्रीमत्-सद्योजात-शङ्कराश्रम-गुरुवर्याणां षष्ट्यब्दपूर्त्युत्सवे गुरुवर्यान् प्रति कृतज्ञतां समर्पयितुं नैके कार्यक्रमाः आयोजिताः । तेषु गुरुपूजनम् अन्यतमम् एव आसीत् । तस्मिन् दिने गुरून् प्रति आदरं, कृतज्ञतां, दृढां भक्तिं च समर्पयितुं सर्वे उपस्थिताः आसन् । युवकयुवत्यः, पुरुषाः, महिलाः, वृद्धाः च देवीदुर्गायाः मन्दिरे एकत्रिताः अभवन् । सर्वेषां मनसि एकः एव भावः अस्माकं गुरुवर्याणां निरामय-आरोग्यार्थं दीर्घायोः च कृते सङ्कल्पिते गुरुपूजने भागः वहनीयः ।

सभाप्रारम्भप्रार्थनायाः अनन्तरं गुरुपादुकास्तोत्रं तथा श्रीपरिज्ञानाश्रमत्रयोदशीस्तोत्रं पठित्वा गुरुपूजनस्य आरम्भः अभवत् । सर्वे एकेन स्वरेण गुरुपूजनमन्त्रान् पठितवन्तः। देव्याः साक्षात् पुरतः केचन भूमौ तथा केचन आसन्देषु उपविश्य एकाग्रतया पूजनं कृतवन्तः। अन्ये केचन प्रेक्षकाः केवलं स्तोत्रान् पठित्वा गुरुपूजने स्वस्य सहभागं दत्तवन्तः । सम्पूर्णं मन्दिरं भक्तियुक्तकम्पनेन पूरितम् । आरतिसमये भिन्नाः ज्योतयः एकत्रीभूय भक्ताः एकस्मिन् ताले स्वरे गुरुपादुकान् प्राणमन्।

कदा गुरुपूजनं समाप्तम् एतत् न ज्ञातम् एव । सर्वेषाम् आननेषु गुरुवर्यान् प्रति अतीव प्रेमयुक्तादरः प्रकटितः । सर्वे श्रद्धया भक्त्या समर्पितपूजनात् आनन्दम् अनुभूतवन्तः ।

# कार्तिक-शिबिकोत्सवः

– सुमन नागरकट्टी, पुणे





→ छायाचित्रम् – अभिनव कल्ला



परमपूज्यश्रीसद्योजात-गुरुवर्याणां षष्ट्यब्दपूर्ति-उत्सवसमये सर्वत्र हर्षोल्लासस्य भक्तिपूर्णं वातावरणमासीत् ।

कार्तिकमासे प्रचलति अस्मिन्नुत्सवे पूर्णिमायाः दिने विशेषः कार्यक्रमः आसीत्-शिबिकोत्सवः ।

नानाविधपुष्पसुशोभित-शिबिकायां विराजमानः श्रीभवानीशङ्करदेवः वाद्यवादनेन सह कार्लामन्दिरस्य प्राङ्गणे भ्रमणार्थम् आगतः। प्रथमं सः यज्ञशालायाः पृष्ठे स्थितायां धात्री-कट्टायाम् उपविष्टः । तत्र वैदिकाः धात्री-होमः अनुष्ठितवन्तः तथा पूजानैवेद्यात् अनन्तरं पूज्यगुरुवर्याणां दिव्य-उपस्थित्यां श्रीभवानीशङ्करदेवाय आरतीं दर्शितवन्तः । ततः श्रीभवानीशङ्करदेवस्य परिज्ञान-सहवास-स्थानं प्रति प्रस्थानम् अभवत् । तत्र पुनः पूजानैवेद्यारतीं स्वीकृत्य भवानीशङ्करदेवस्य मन्दिरे आगमनमभवत् । मन्दिरे सततं चलितं मधुरं भजनम् उत्साहवर्धकमासीत् । वाद्यवादनभजनगीतस्य अभ्यन्तरे तस्य अनुषङ्गेण दोलायमानाः श्रीभवानीशङ्करदेव-विराजित-शिबिकां वहन्तः शिबिकाधारिणः देवीं परितः पञ्चप्रदक्षिणाः कृतवन्तः । तत् दृष्ट्वा सर्वे साधकाः अतीव आनन्दमनुभूतवन्तः । अन्ते गुरुवर्याः स्वयं भजनं प्रस्तुतीकृतवन्तः । तम् अनुसृत्य सर्वे साधकाः गीतवन्तः । गुरुवर्याणां स्वरेण विशेषहर्षोर्म्यः भक्तानां हृदये सञ्चारिताः । अन्ते शिबिकां समाधिपुरतः संस्थाप्य आरतीं दर्शयित्वा वैदिकः विधिवत् श्रीभवानीशङ्करदेवं समाधि-कक्षायां पुनर्स्थापितवान्।

एकः अलौकिकः शिबिकोत्सवः आसीत् अयम् ।

# अन्य-सांस्कृतिक-कार्यक्रमाः

– सुधा कार्नाड, बेङ्गलूरु

## पुनश्च गोलमाल



इदम् आसीत् एकं हास्यप्रधानं नाटकम् । धनस्य अभावः अस्ति चेदपि अन्येषां पुरतः ' वयं धनिकाः ' इति आभासी प्रदर्शनं मनुष्याणां स्वभावः । अस्मिन् प्रहसने व्यङ्ग्यम् अनुसृत्य एतस्य स्वभावस्य निरूपणं कृतमासीत् । बिपिन-नाडकर्णी-महोदयेन निर्देशितमिदं नाटकं मनोरञ्जकं बोधप्रदम् अपि च आसीत् ।



## दासरेन्दरे पुरन्दरदासरैय्या

इयं नृत्यप्रस्तुतिः प्रसिद्ध-सन्तकवि-पुरन्दरदासस्य रचनानाम् आधारेण आसीत् । कर्णाटक-सङ्गीतस्य जनकः इति प्रख्यातः पुरन्दरदासः न केवलम् एकः गायकः किन्तु सः सन्तकविः अपि आसीत् । भरतनाट्यं-नृत्यशैल्युपरि आधारिता इयं प्रस्तुतिः तस्य जीवनस्य घटनाः विशदीकृतवती । सङ्कल्पना नृत्यनिर्देशनं च आसीत् स्मिता-महाजन-महोदयायाः। लास्यमयी रमणीया च आसीत् एषा प्रस्तुतिः।

## टु लेट

इदम् आसीत् अन्यत् एकं हास्यपूर्णं तथा बोधप्रदं नाटकम् । सर्वेषां जीवने वयोवृद्धानां कियती आवश्यकता अस्ति । तेषाम् अनुभवाः अस्माकं पथदर्शकाः भवन्ति अस्मान् क्लेशेभ्यः उद्धरन्ति च। अतः एव ते आदरणीयाः तथैव तेषां स्थानं वृद्धाश्रमे नैव किन्तु अस्माकं गृहे एव इति सन्देशः इन्दु-नागरकट्टी-भगिन्या तस्याः लेखन-निर्देशनात् अतीव सुश्लिष्टतया प्रदत्तः।





## सुरीले गीतोङ्की बहार

एतत् नाम हिन्दीचलच्चित्रगीतानां सङ्गीतगुच्छः परमपूज्य-शङ्कराश्रमसद्योजात-स्वामिनः चरणकमलयोः नैकैः साधकैः समर्पितः । सङ्कल्पना सञ्चालनं च आसीत् शिवा-गुलवाडी-महोदयस्य । हिन्दी-चलचित्राणां स्वर्णकालतः-यदा स्वरसम्पदा सम्राज्ञी आसीत्-ततः उद्धृतानां पुरातन-लोकप्रिय-गीतानां प्रस्तुतिः मधुरा मनोभिरामा च आसीत्।

# विदेशतः प्रस्तुतिः ...

## स्नेहगुच्छार्पणम्

**– वृन्दा त्रिकन्नाड , न्यू जर्सी**

अस्माकं प्रियगुरुवर्याणाम् अपारप्रसादेन एव अस्माकं कृते सुन्दर-सुलभ-संस्कृतभाषायाः अध्ययनस्य अद्भुतः अवसरः प्राप्तः। प्रत्येकस्यां संस्कृतकक्षायाम् एषः कृतज्ञताभावः तु सदैव प्रार्थनया प्रकटीकुर्मः ।

यदा गुरुवर्याणां षष्ट्यब्दपूर्तिः उत्सवरूपेण आयोजयितुं निर्णयः कृतः तदा विदेशसभानां संविभागस्य कृते अपि समयः निर्धारितः। एतत् तु प्रियगुरुवर्यान् प्रति अस्माकं प्रेमार्पणं भवति न वा ! तस्मिन् क्षणे केवलं गुरुवर्यप्रेरितायाः प्रस्तुत्याः शीर्षकं ' स्नेहगुच्छगुरुचरणाम्बुजार्पणम् ' भवेत् इति विचारः मनसि उत्पन्नः। त्रयाणां चाटुश्लोकानां साङ्गणिक-लघुप्रस्तुतिकरणं सुनिश्चितम् । प्रथमः श्लोकः अस्माकं चित्रापुरमठस्य रथोत्सवस्य समये एकः शिवपार्वत्योः विनोदपूर्णसंवादः। द्वितीयः यशोदाकृष्णयोः मध्ये किं सम्भाषणं भवति तस्योपरि एकः मधुरः श्लोकः । तृतीयः अपि पार्वती-कार्तिकेय-गजाननानां मध्ये विनोदभावपूर्णः मधुरचाटुश्लोकः।

अस्माकं प्रियगुरुवर्याणां चरणकमलयोः एतस्याः प्रस्तुत्याः अर्पणम् इति मनसि धारयित्वा प्रत्येकः स्वस्य सर्वोत्तमप्रयत्नं कुर्वन् आसीत्।

अन्ते, नियोजितसमये, प्रियगुरुवर्यकृपया अस्माकम् एतं स्नेहगुच्छं गुरुचरणाम्बुजार्पणं कृतवन्तः।

# प्रसन्नोऽस्तु गुरुः सदा

**– ममता सौकूर , बॉस्टन**

अस्मिन् षष्ट्यब्दपूर्ति-उत्सवे  विदेशतः विविधदेशेभ्यः शताधिक-आबालवृद्धाः सहभागम् ऊढवन्तः।

भरत-कुण्डाजे-महोदयेन सुश्राव्य- शास्त्रीयसङ्गीतं तथा रागेश्री-रागस्योपरि आधारितं मधुरभजनं प्रस्तुतम् । पण्डित-ओङ्कार गुलवाडी-तबला वादनेन , चैतन्य नाडकर्णी-वेणुवादनेन , गीता मूड्बिद्री-संवादिनी वादनेन च सहयोगं कृतवन्तः ।

विदेशतः नैके साधकाः परमपूज्यगुरुवर्याणां पवित्रचरणयोः विविधाः प्रस्तुतयः  समर्पितवन्तः। प्रस्तुतिषु वाद्यसङ्गीतं ,  भजनसेवा , श्लोकपठनं ,  नाटकानि , लघु-संस्कृत-नाटिका , स्वानुभवाः , भरतनाट्यं , कथ्थकनृत्यं , ललिता-लवङ्गा-अष्टपदी-नृत्यं  इत्यादिनि आसन् ।

' मूलाधार ' नाम एकं वृत्तचित्र-शैली-प्रदर्शनम् आसीत्  यत्र बालानां प्रदर्शनानि तथा  वरिष्ठसाधकानां अनुभवाः च प्रदर्शिताः । विदेशतः विभिन्नदेशेभ्यः विभिन्नवयोवर्ग-साधकाः 'प्रसन्नोऽस्तु गुरुः सदा' भावनया प्रतिभाप्रदर्शनं श्रीचरणयोः समर्पितवन्तः।








# गरबानृत्यम्

– **सुनेत्रा नागरकट्टी , बेङ्गलूरु**

गरबानृत्यप्रकारः सामान्यतः दुर्गादेव्यै समर्पितं नृत्यम् । अतः परमपूज्य-सद्योजात-शङ्कराश्रमगुरुवर्याणां षष्ट्यब्दपूर्ति-कार्यक्रमान्तर्गतं कृतमिदं नृत्यं भक्तवृन्देन कार्लामठस्थितायै दुर्गापरमेश्वरीदेव्यै भक्त्या समर्पिता सेवा ।

अस्य कार्यक्रमस्य कृते मठस्य प्राङ्गणे स्थापिते भव्य-कैलास-मण्डपे भावपूर्णसङ्गीतमनुसृत्य नैके भक्ताः तालबद्धं, लयबद्धं पदविन्यासं कृतवन्तः । देव्याः मन्द-लये स्तुतिपरशब्दालङ्कृतगीतानां नृत्यपदैः मनसि अतीव शान्तिः अनुभूता । तथैव यदा गीतस्य शीघ्रलयेन नृत्यस्य गतिः वर्धिता तदा तत् नृत्यम् अत्यन्तम् उत्साहवर्धकं जातम् ।

परमपूज्यगुरुवर्याणां षष्ट्यब्दपूर्ति-उत्सवः उत्साहपूर्णः, आनन्ददायकः , भक्तिमयः भवितुं गरबा-नृत्यस्य अपि योगदानमासीत् । आबालवृद्धाः, सर्वे अत्यन्तोत्साहेन भागम् ऊढवन्तः। यथाशक्ति, यथामति नर्तितवन्तः । काश्चन महिलाः सुन्दराणि आभूषणानि तथा बहुवर्णीयानि भारतीयवस्त्राणि धारयित्वा आगताः । तेषां नृत्यसौष्ठवेन समृद्धभारतीयसंस्कृत्याः दर्शनं जातम् । पुरुषवर्गेण अपि उत्साहेन नृत्यं कृत्वा नर्तनानन्दस्य आकण्ठपानं कृतम् । येषां कृते नर्तनम् अशक्यम् आसीत् तेऽपि स्वासन्दे उपविश्य नृत्यदर्शनस्य आस्वादं स्वीकृतवन्तः ।

सर्वे साधकाः निस्सङ्कोचं गरबायाः आनन्दम् अनुभूतवन्तः । नृत्यसमये प्रत्येकस्य पदन्यासं भिन्नं, हस्तमुद्राः भिन्नाः, मुखे भावाः अपि भिन्नाः



किन्तु तालः एकः, लयः एकः,सङ्गीतमपि एकम् एव । सत्यमेव ... विविधतायाम् एकता दृष्टा अत्र । मग्नीभूय कृतं नृत्यं ध्यानमिव किल ? सार्धैकहोरानृत्यानन्तरमपि उत्साहे न्यूनता नासीत् । एतदस्ति गुरुशक्तिप्रमाणम् ।

अस्माकं चित्रापुरमठस्य आराध्यदेवः भवानीशङ्करः। नर्तनं कुर्वतः शङ्करस्य एकमन्यत् रूपं... नटराजरूपम् । चित्रापुरमठे भवानीशङ्करस्य अष्टावधानसेवा क्रियते | चतुर्वेद-पुराण-गद्य-पद्य-सङ्गीत- इत्यादयः अष्टसेवाः आचर्यन्ते । परमपूज्य-सद्योजातशङ्कराश्रम- गुरुवर्याणां षष्ट्यब्दपूर्ति-समारम्भस्य अवसरे कृतं गरबा-नृत्यं नटराजरूपि-भवानीशङ्कराय अर्पिता नवमी सेवा , नृत्यसेवा इति भावना मनसि उत्पन्ना ।

भक्तिरसपूर्णेन कृतः एषः गरबा-नृत्याविष्कारः श्रीचरणयोः सेवारूपेण समर्पितः।

## शब्दपटः - उत्तराणि

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| भ | २↓ | वा | प्रि | द | श | रू | ५↓ |
| ४→ | अ | र्ध | ना | री | श्व | रः | की |
| लि | र्क | गो | दा | त | बि | ल | र्ति |
| ६↓ | पु | ३→ | अ | प | स्मा | रः | मु |
| भ | ष्प | हि | ८↓ | सः | न | भ | ख |
| गी | म् | १→ | शि | व | लि | ङ्ग | म् |
| र | अ | न | ला | क | पो | ग | ण |
| थः | न्दि | इ | दः | नि | ७→ | च | न्द्रः |

# मनोगतम्

**लेखः – गिरीश सारस्वत , गाजियाबाद**
**अनुवादः – भूमा बोहरा , जोधपुर**
**शिवानी कल्याणपुर , बेङ्गलूरु**



परमपूज्य-श्रीमत्-सद्योजात-शङ्कराश्रमस्वामिनः षष्ट्यब्दपूर्त्युत्सवे श्रीदुर्गापरमेश्वरीमन्दिरं कार्लामठमागत्य जीवनं धन्यमभवत् ।

परमपूज्यस्वामिवर्य! भवतां शिष्यत्वं प्राप्य एतस्मिन् जीवने अस्माभिः अमूल्यः निधिः प्राप्तः ।

अध्यात्म-शिखरस्थितानां भवताम् उपदेशाः आशीर्वादाश्च अस्माकं कृते अमृततुल्याः ।

गुरुवर ! एतस्मिन् पावन-उत्सवे भगवतः भवानीशङ्करस्य पावन-चरणकमलयोः एषा एव प्रार्थना यत् अस्माकं जीवनं भवतां कृते समर्पितं भवेत् । गुरुवर! अहं दोषी अज्ञानी च सन्नपि भवतां शिष्यं मत्वा सदैव मयि कृपादृष्टिं स्थापयन्तु। कृतत्रुटीनां कदापि पुनरावृत्तिः मा भवेत् इति मतिं ददतु ।

**शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ।**
**लब्ध्वा कुलगुरुं सम्यग् गुरुमेव समाश्रयेत ॥**
**( गुरुगीता )**

अहं सर्वदा भवतामेव भवेयम् इति मम पुनः पुनः अनुरोधः। भवतां परम पावनचरणकमलयोः मम कोटिकोटिप्रणामाः ! हे गुरुवर ! भवतां कृपाकटाक्षः एव अस्माकं लक्ष्यं निधानञ्च। शिरसा नमाम्यहं गुरुचरणपादपद्मयुगलम् ।

**सम्पादिका –** वरदा सौकूर
**पृष्ठरचना –** वन्दना बळवळ्ळी
**सम्पादकीयसमितिः –** शीला कळावर , दुर्गा कुम्टा , अर्चना काप्राडक , सुधा कार्नाड , शिल्पा मुदूर
**सम्पादकीयसाहाय्यम् –** तेजश्री बैलूर
**छायाचित्राणि -** श्रीचित्रापुरमठ-जालस्थलतः

**अभिप्रायं तथा लेखं प्रेषयितुम् इच्छुकानाङ्कृते सम्पर्कः -**
**Email id: girvanapatrika@chitrapurmath.net.in** (लेखार्थं शब्दमर्यादा-२५०)

**गीर्वाणप्रतिष्ठायाः संस्कृताध्ययनार्थं संस्कृत-सम्भाषणार्थं च जालाधारित-वर्गाः प्रचलन्ति ।**
**पञ्जीकरणाय आवेदन-पत्रस्य सम्पर्क-सूत्रम्**
**https://chitrapurmath.net/site/activities-girvanaprathistha-online-classes**

Scan QR Code for Enquiry Form